- Title – अज्ञात
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 6/12
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language – संस्कृत
- Period –
- Beginning – श्रीमते रामानुजाय नमः
- End –
- Colophon-
- Illustrations -
- Source -
- Subject -
- Revisor -
- Author -
- Remarks- अपूर्ण

२ श्रीमते रामानुजाय नमः ब्रह्मणानुष्पन्नैर्गुणैरुपघटनैस्त्रिविधां त्रयीम् एकधा वदन्तो
ऽपि त्रयीं निष्ठां नमस्महे १ इह तावदचिन्त्यविविधविचित्ररचनास्पदस्थिरत्रस
भेदभिन्ननिखिलजगज्जननरक्षणलयलीलादक्षिणं परं ब्रह्म लक्ष्मीपतिपादपंत्योपनतो
वेत्याद्याः श्रुतयस्तदुपबृंहणानि सार्ववित्तसत्यसंकल्पानन्तकल्याणगुणानादिशंति प्रति
क्षिपंति च तद्विरोधिनो हेयगुणानिति निरस्तसमस्तहेयसंबंधामनवधिकगुण
रत्नरत्नाकरं ब्रह्म सम्यगुपासीना नास्तारं तितुलसंसारमिति सार्वजनीनमेतत् २
व ईदृशं च कुलालकुविंदादेर्घटपटादिनिर्मितुस्तदुपपुष्पाक्तिस्तदुपादानगोचरा राम
परोक्षतत्तानाद्याश्रयत्वमेतदेव श्रुत्यंतराण्यवाधितं कथयंति यः सर्वज्ञः सर्ववित् १

2

3

२ नत्वोपत्तपाठाकृत्स्नस्य वेदस्यानेकविषयत्वात् तदाह वृत्तिकारः संहितमेतच्छारी
रकंजैमिनीयेनषोडशलक्षणेनेति एवंवेदनाभगवताबादरायणेनप्रतिपाद्य
स्वरूपस्यैवप्रतिपादकश्रुतिस्वरूपस्यापिप्रकारान्तरेणत्रैविध्यंसूचितम् स
गुणश्रुतयोनिर्गुणश्रुतयोघटकश्रुतयश्चेति एतच्चभेदाभेदघटनप्रकारैःश्रुति
तिप्रकारत्रैविध्यंप्रतिपादयद्भिर्भगवद्भिर्भाष्यकारैर्महासिद्धान्तेदर्शितम् तत्रसगुणश्रु
तयोपित्रिप्रकाराः कार्यत्वकारणत्वधर्मपरत्वानंदमयित्वप्रतिपादनमुखेनतद्रूपपु
क्षमाशान्तिसौशील्यवात्सल्यौदार्यानंदाद्याद्योतकाः अन्याश्चब्रह्मादिनामनिर्वचनमुखे
नतन्मूर्तिनिमित्तनामान्यसाधारणगुणविशेषप्रतिपादनपराः अपराश्चश्रुति। राम
२

यस्य ज्ञानमयं तपः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च सत्यका
मः सत्यसंकल्पः सर्वस्य वशी सर्वेशानः सत्यं ज्ञानमनन्तं ब्रह्म नित्यं विज्ञानमानन्दं ब्रह्मे
त्याः दीनि एवंभूतम वति त्रयीवाच्यो हि वेदस्य त्रिप्रकारतां ब्रूते त्रिपाद्ब्रह्मसंख्यापा ब्रह्म
वेविहितस्य तपसोऽज्ञादेयोऽत्रयीपदव्युत्पत्तेः अत्र श्रुतः सामान्यप्रत्यूमीति विभा
गात्त्रिप्रकारतां केचिदूचिरे विधिमन्त्रार्थवादरूपत्वान्नाद्यं प्रथमपरे कर्मदेवताब्र
ह्मरूपप्रतिपाद्यत्रैविध्यान्नाद्वितीयमन्ये भगवान्बादरायणस्तु जीवमुख्यप्राणलिङ्गा
न्नेति चेन्नोपासात्रैविध्यादित्यभिदधान त्रिविधोपासनाविषयत्वात्त्रयीत्वं ब्रह्मवति द्विपन्न
पुत्रं चैतन्न पूर्वकाण्डप्रतिपाद्यानामग्निकर्मणां परमपुरुषाराधनवेषनत्वात्तदुपास

अनधीतशास्त्राणां तेषां सह आप्तवाक्याद् अधीतशास्त्राणां पदे
दीकरणमुपपद्यते

२ त्वाद् बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयत इति सोऽयं बृंहणं निर्वचनम् अत्र बृंहति
इति निरुपाधिकबृहत्त्वरूपो गुणः प्रवृत्तिनिमित्तमुच्यते तच्च स्वरूपेण गुणैश्च
निरतिशयितम् बृहत्त्वं च गुणैः स्वरूपेण गुणैश्चेति यच्चानवधिकातिशयं सोऽस्य
मुख्योऽर्थ इति अत्र गुणेनो बृहत्त्वं नाम बृंहणत्वं तद्धि तच्चानन्तव्यापकत्वे कृत्या
दिस्मृतिप्रतिपन्नबहुजन्मसहस्रसंततिसंततसांसारिकपुण्यापुण्यनिगलभग
नविमोचनपूर्वकनिरवधिकज्ञानविकासावहत्वोपेतत्वं तत्कारुण्यापनंत
कल्याणगुणवत्त्वरूपं तच्चोभयं ब्रह्मपदप्रवृत्तौ निमित्तं अगद्राधिकाविवृणोत्यपि: राम
स्तोभयपादप्रवृत्तौ निमित्तत्वादत्र पदार्थे जैमिनिः अधिकं च विवृणोति जैमिनिस्तोभ २

गुणगणाद

6

त्विकतत्त्वज्ञानविरोधपराः तत्राद्याः सदेव सौम्येदमग्र आसीत् एकमेवाद्वि
तीयं तदैक्षत बहु स्यां प्रजायेय ब्रह्म वा इदमग्र आसीदात्मा वा इदमेक एवाग्र
आसीदेको ह वै नारायण आसीदित्याद्याः तत्र हि सुरनरतिर्यक्स्थावरादि
भेदभिन्नानन्तक्षेत्रीरपरिणामहेतुभूतजनत्तदानीमुपपन्नानि नाधुनातनसुकृ
तदुष्कृतपरिपाकपरिच्छिन्नसापेक्षं विचित्रजगन्निर्माणं तत्तदुपयुक्तशक्त्या
दिकं विनानुपपद्यमानं तदाक्षिपति तद्विरोधप्रसक्तानामप्याप्तानविपरीतत्वा
नेतन्मूलवादसंबंधाद्यं च प्रतिक्षिपति एतदेव ब्रह्मादिनाम निर्वचनपरा
भिरपराभिरपि श्रुतिभिरुपपद्यते बृहति बृंहयति तस्मादुच्यते परं ब्रह्म बृह

७ अर्थयतीति तन्मर्त्यम् अथ पर्यंते नो भोयच्छतीति निर्वचनात् अनेनवं
त्वं हणत्वमुक्तम् हे पञ्चत्वनी क्रौं फलितम् न हि स्वयं दोषि अन्यानदुष्टान्कु
र्यात् आनंदवत्वं च फलितम् न हि स्वयम् अनानंदी अन्यानानंदयेत् एषह्ये
वानंदयातीति श्रुतिः अनेन मंत्रे पुरुषोत्तमत्वमपि सूचितमिति ब्रह्मशब्दे
न पुरुषोत्तमोऽभिधीयते इत्यभाषिषु भगवान्भाष्यकारः गीयते च यस्मा
त्क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोऽस्मि लोके वेदे च प्रथितः पुरुषो
त्तम इति येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति
श्रुतिगत भगवद्व्यापारेण पुरुषशब्द ब्रह्मशब्द सामानाधिकरण्येन
चेहोपपद्यमानम् ज्ञानमिति मिषप्रत्तं सात्त्वात्तद्व्यपदेशः तेन सार्वज्ञं

शद्वत्वादिति एतेनपंकजपादेपंकजनिकर्तृत्वस्यकुमुदादाविवव्रह्मत्वस्यव्रह्मगुणादाव
तिप्रसंगित्वात् तत्रपद्मत्वमिवेहव्रह्मत्वमपिनिमित्तमन्तरलक्षणायोगाद्व्रह्मत्वमपीति
केचित् अन्येतुसामान्यंपरासाधारणंव्रह्मत्वमेवात्रनिमित्तमितिनिर्विवादमस्मादस्मा
तथैव दगतंभाषितंवर्णनद्भातिसोदनीनान्यतराणिगुणतोव्रह्मत्वंनामसत्तारकंव्रह्मत्वंगुण
दराहि ~~श्रुतिरप्यनुमेवार्थसविशेष~~ + तदिति युक्तंचेतनत् शब्दप्रमाणत
च कौस्यस्वतः प्रमाणत्वाद्वद्व्रह्मत्वमानस्य स्वरूपतो निरतिशायव्रह्मत्वस्य चातिप्रसंगित्वा
त् श्रुतिरप्यनुमेवार्थसविशेषमाह सत्यंज्ञानमनंतंव्रह्मेति अत्रहि सत्यपदाद्यो
युक्तामुक्तनिर्धन्त्वाचित्सन्वमिति एतानि कानि श्यन्तरादि अथपदासतन्मत्तं

९

५ दिनामनिर्वचनैर्नैयपूक्षानि एवंध्यात्वामुनिर्गछति भूतयोनिम सम
स्तसाद्वितमसः परस्तात् आत्मावारेद्रष्टव्यः श्रोतव्योमंतव्यो निदि
ध्यासितव्य इत्यादिनाध्यानविधये ध्येयस्य सोग्नीत्यादीनांदि
पंति तथाहि ननिरालंबतानं केनाप्यंगीक्रियते नचशक्यतेनिरा
निराकारेण ध्यनापेहादत एवगणे पसंहारानुपसंहारविचारः सर्वो
पनिर्वृद्धः विद्याभेदोप्यत एव निरवद्यः गुण वेद्यभेदाभावे विद्याभे
दापोगा विद्यका गुणा इतिचेदा विद्यकानां विद्याविषयत्वायोगात् राम
परएव शक्ति विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति स्वा ५

चकलितम् अनंतशब्दश्चानंतं गुणानां गच्छंति तेनानंतोयमुच्यते इति निर्वच
नात् गुणापरिपूर्णत्वं दर्शयति देशापरिच्छेदाभावेन बृहत्वं चाविष्कृतम्
अतएव वेदे भूरिप्रयोगाद्गुणयोगाच्च शार्ङ्गिणि तस्मिन्नेव ब्रह्मशब्दो मु
ख्यवृत्तो महामुने यस्मिन्प्रयुज्यमाने तु गुणयोगः सुपुष्कलस्तत्रैव मु
ख्यवृत्तोयमन्यत्र ह्युपचारत इति पौराणिकानाम् अद्घोषः अतएव
पुष्कलइति दोषानभंगशक्यं दर्शितम् अतएव हि समर्थ्यते ज्ञान
शक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः भगवच्छब्दवाच्यानि विना
हेयैर्गुणादिभिरिति भगवन्नाम निर्वचनम् एवं नारायणवासुदेवा

॥

भवाच्च यदि नित्यनिर्दोषाणौ रूपेषवाकस्यास द्विषयक ध्यान
विधानार्थत्वायोगात् विहित ध्यानविजयन्नलया यात्मनिश्चय
यान्ना रोपसंभवः नहिति हृदैवत्तगुणाः अपि स्वाभिकाद् इत्यासी
यत्तान् तया सति येन्यप्यासं तमात्मानमन्यया प्रति पद्यते किं
तेननकृतं यापं चैतोरणत्माप्यहाणि इत्यादिस्मृत्युपबंहिताभि;
अपयोन्यथातोविदुः अन्यएजानत्तेदन्यलोकाभवंत्यादिश्रु
(त्युपबंहित्ताभिः अपयोन्यथातो) तिभिरपिन निरोधोवतीत्या तम
धन्यत्राविस्तरः तदेवकारणात्व ध्यानविधया क्षिप्तः नन्उपास्य ६

भाविकत्वकीर्त्तनविरोधाच्च। यः सर्वज्ञः सर्ववित् सत्यकामः सत्य
संकल्प इत्यादिषु स्वरूपगुणपरवाक्येषु तदसंभवाच्च तथात्वेवा
स्वरूपे विशिष्टापत्तेश्च न च निरवच्छिन्नभ्रमानुपपत्त्या स्वरूपे
तथात्वं न कल्पनार्हं गगनारोपितगंधर्वनगरादौ सोपप्लसौंदर्य्यप्रु(
त्किमाधारोपितदर्शनेन न निरूपनासिद्धेः मिथ्याध्यासितिन्यायेन
तदुपपत्तेश्च भावनाप्रकर्षाच्छिन्नछपनवनितादिध्यानविष
यतादर्शनेन च असिद्धविषयारोपस्यान्यान्येन विषयारोपेण
विध्यानसंभवाच्च ध्यान एव विषयस्यतास्मिन्गुणानां चारोपसं